दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शरद-ऋतुः
सूर्यः दक्षिणायनम् माघकृष्णावस्या
माघ 05 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-87 | 1 | जनवरी 18, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 केन्द्रीयमन्त्रिणा सह मुख्यमन्त्री सुक्खुः समागत्य, सेबफलस्य उत्कर्षकाले आयात- निषेधाय आग्रहः कृतः

3 हिमाचलप्रदेशे ३१ पञ्चायतीनां सीमाः परिवर्तनीयाः भवितुं शक्नुवन्ति। मन्त्रिमण्डलस्य सभायां एतत् प्रस्तावं प्रस्तौतुं निश्चितम् अस्ति

5 अमरवाणीकविपरिषदा आयोजितम् एकमासात्मकं शीतकालिकं संस्कृतसम्भाषणशिविरम्

## सुभाषितम्

**एकस्तपो द्विरध्यायी,**
**त्रिभिर्गीतं चतुः पथम्।**
**सप्त पञ्च कृषीणां च,**
**सङ्ग्रामे बहुभिर्जनैः।।**
**-महासुभषितसंग्रह**

अर्थात्-तपस्या करने के लिए एक व्यक्ति भी सक्षम होता है, परन्तु अध्ययन कार्य के लिये दो व्यक्ति (शिक्षक तथा विद्यार्थी) आवश्यक हैं। इसी प्रकार संगीत के लिए कम से कम तीन व्यक्ति (गायक, वादक व श्रोता) आवश्यक हैं।कृषिकार्य के लिए सात या पांच व्यक्ति आवश्यक होते हैं तथा संग्राम करने के लिए तो बहुत अधिक सैनिकों की आवश्यकता होती है।

दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily
Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message
saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## छत्तीसगढ़स्य बीजापुर-जनपदे एकस्मिन् आक्रमणे द्वौ माओवादिनौ, सुरक्षाबलेन मारितौ



**हिमसंस्कृतवार्ताः** - छत्तीसगढ़स्य बीजापुर जनपदे एकस्मिन् आक्रमणे द्वौ माओवादिनौ, सुरक्षाबलेन मारितौ। आरक्षि बलानुसारं जनपदस्यास्य उत्तरे-पश्चिमी क्षेत्रस्य वने माओवादिनः आसन्। तेषाम् अन्वेषणाभियानमपि प्रातः काले अभवत्। तदनन्तरं घटनास्थले एव प्रहारेण तेषां मृत्युः अभवत्।

### पंजाब-हरियाणा राज्ययोः अग्रिम-चतुर्दिवसेषु अल्पवृष्टेः पूर्वानुमानम्

भारतीय-ऋतु-विज्ञान-विभागेन पंजाब-हरियाणा राज्ययोः अग्रिम-चतुर्दिवसेषु अल्पवृष्टेः पूर्वानुमानं प्रकटितम्। भारतीय-ऋतु-विज्ञान-विभागस्य वरिष्ठ वैज्ञानिकः डॉ० आर. के. जेनामणिः अब्रवीत् यत् मासस्यास्य अन्ते उत्तरपश्चिम राज्येषु वृष्टिः भवितुम् अर्हति श्री जेनामणिः अवोचत् यत् शीतप्रवाहे नीहारे च न्यूनता दृग्गोचरी भवति।

### प्रधानमन्त्रिणा तृणमूलकांग्रेस-दलस्योपरि प्रश्नचिह्नः उत्थापितः

प्रधानमन्त्री पश्चिम बंगालस्य स्व-यात्रावधौ तृणमूल कांग्रेस दलस्योपरि प्रश्नचिह्नः उत्थापितः। अवैध गतिविधीनां विषये च तेन प्रोक्तं यत् एषा गभीरा समस्या वर्तते। यया क्षेत्रीय जनसांख्यिकी परिवर्तिता सममेव भाषा च परिवर्तिता विद्यते। तत्रैव नवीदिल्लीनगरे वार्ताहरसम्मेलनं सम्बोधयन् भाजपाप्रवक्ता संबितपात्रः आरोपितवान् यत् पश्चिमबङ्गस्य मुख्यमन्त्री हिंसायाः औचित्यं दर्शयति, राज्यं पृथक् कर्तुं च लक्ष्यं करोति। सः अवदत् यत् टीएमसी नगरस्य वरिष्ठः नेता असंवैधानिकं हिंसकं च साधनं स्वीकृत्य विशेषसघनपुनरीक्षणस्य (एसआईआर) अभ्यासं स्थगयितुं प्रयतते।

## पश्चिमबङ्गस्य मालदा-नगर-रेलस्थानके, गुवाहाटी (कामाख्या)-हावड़ा-नगरयोः मध्ये भारतस्य प्रथमं वंदेभारत-रेल-शयन-यानाय हरितध्वजं प्रदर्शितवान् प्रधानमन्त्री नरेन्द्रमोदी

**हिमसंस्कृतवार्ताः** - प्रधानमन्त्री नरेन्द्रमोदी अनेकासां रेल-परिवहन-परियोजनानां शुभारंभम् अकरोत्। प्रधानमन्त्री पश्चिमबङ्गस्य असम-राज्यस्य च द्विदिवसीय यात्रायां अस्ति। प्रवासस्य प्रथमे दिने, मालदा-नगर-रेलस्थानके, गुवाहाटी (कामाख्या)-हावड़ा-नगरयोः मध्ये भारतस्य प्रथमं वंदेभारत-रेल-शयन-यानाय हरितध्वजं प्रदर्शितवान्। सः पश्चिमबङ्गस्य मालदानगरे सार्वजनिककार्यक्रमे सार्द्ध-द्वि-शताधिक-त्रि-सहस्र-कोटि-रूप्यकाणां बहुविध-रेल-मार्ग-अवसंरचना-परियोजनानां शिलान्यासम् अपि कृतवान् । अवधेयं यत् अनया परियोजनया यात्रायां सौकर्यम् आयास्यति।



सुरक्षा दृष्ट्या च जनाः लाभं प्राप्स्यन्ति। एतदतिरिक्तं प्रधानमन्त्री माल्दानगरे चत्वारि नूतनेभ्यः अमृतभारत-एक्स्प्रेस-रेलयानेभ्यः हरितध्वजं प्रदर्शितवान् । रेलमंत्रिणा अश्विनी वैष्णवेन समुदीरितं यत् नूत्नानि रेलयायानि प्रविधिनामुपयोगेन निर्मितानि। एतेषा निर्माणमपि बहद् संख्यायां क्रियते।

## षड्विंशत्यधिक द्विसहस्रतमवर्षस्य महाराष्ट्र-राज्यस्य निर्वाचने भाजपेति दलेन विजयम् अवाप्तम्



**हिमसंस्कृतवार्ताः** - षड्विंशत्यधिक द्विसहस्रतमवर्षस्य महाराष्ट्र-राज्यस्य निर्वाचने भाजपेति दलेन विजयम् अवाप्तम्। ऊनत्रिंशत् नगर निगमस्य ऊनसप्तति-अधिक-अष्टशतोत्तर द्वि-सहस्र आसनेषु भाजपेति दलेन पञ्चविंशत्यधिक चतुःशतोत्तर-एकसहस्र-आसननि विजितानि। अन्तिमगणनायाः अनुसारं शिवसेना इति दलेन नवनवतिः अधिक त्रिशत आसनानि, काङ्ग्रेस इति दलेन चतुर्विंशत्यधिकत्रिशत-आसनानि, एन-सी-पी-इत्यनेन सप्तषष्ठ्युत्तरैकशत आसनानि, शिवसेना इति दलेन पंचपंचाशत् अधिक, एम. एन. एस. इति दलेन त्रयोदश आसनानि, अपि च वी. एस. पी. इति दलेन षट् आसनानि समधिगतानि।

## जयपुरे ४० राष्ट्रमण्डलदेशानां प्रतिनिधिमण्डलस्य स्वागतं कृतम्,

राष्ट्रमण्डलस्य ४० देशेभ्यः १२० सदस्यीयः प्रतिनिधिमण्डलः द्विदिनयात्रायै जयपुरम् आगतः। प्रतिनिधिमण्डलं ऐतिहासिकं आमेरदुर्गं गतम्, तत्र तेषां पारम्परिकं राजस्थानीयस्वागतं कृतम्। दुर्गस्य भव्यं वास्तुकला, जीवन्तं सांस्कृतिकं प्रदर्शनं, लोकसङ्गीतं च आगन्तुकान् मंत्रमुग्धं कृतवान् । प्रतिनिधिमण्डलं दुर्गस्य राजपूतयुगस्य इतिहासस्य विषये अवगतं कृत्वा दीवान-इ-आम, दीवान-इ-खास, गणेशपोलः, शीशमहलः, मानसिंहमहलः इत्यादीनां प्रमुखसंरचनानां भ्रमणं कृतवान्। शीशमहलस्य जटिलाः दर्पण-उत्कीर्णनानि, माओता-सरोवरस्य विहङ्गमदृश्यानि च अतिथिन् विशेषतया आकर्षितवन्तः । ते अमेरं भारतस्य सांस्कृतिकविरासतां जीवन्तं प्रतीकं वर्णितवन्तः । राष्ट्रमण्डलदेशानां राष्ट्रप्रमुखाः, सांसदाः, वरिष्ठसंसदीयाधिकारिणः च समाविष्टस्य प्रतिनिधिमण्डलस्य स्वागतं जयपुर-अन्तर्राष्ट्रीयविमानस्थानके राजस्थान-विधानसभायाः अध्यक्षेन वासुदेवदेवनानीना कृतम्।



# केन्द्रीयमन्त्रिणा सह मुख्यमन्त्री सुक्खुः समागत्य, सेबफलस्य उत्कर्षकाले आयात- निषेधाय आग्रहः कृतः



**हिमसंस्कृतवार्ताः- शिमला।** मुख्यमन्त्री सुखविन्द्रसिंहः सुक्खूः शुक्रवासरे सायंकाले नवदिल्ल्यां केन्द्रीय- वाणिज्य- उद्योग- मन्त्रिणा पीयूषगोयलेन सह भेंटं कृतवान्। तत्र सः सेबफलोत्पादनस्य उत्कर्षकाले (जुलाईतः नवम्बरपर्यन्तम्) सेबफलस्य आयाते निषेधं कर्तुं विनम्र आग्रहं कृतवान्। सः सेबफले आयातशुल्कं वर्धयित्वा शतप्रतिशतं कर्तुमपि आग्रहं कृतवान्, येन विदेशीय-सेबफलस्य आयातेन राज्यस्य बागवानां हानिः न भवेत्। मुख्यमन्त्री उक्तवान् यत् प्रदेशे प्रायः द्विलक्षपञ्चाशत्सहस्र (२.५ लक्ष) कृषकाः सेबफलोत्पादने संलग्नाः सन्ति। सः अवदत् यत् राज्यस्य सकलफलोत्पादने सेबफलस्य योगदानं प्रायः ८० प्रतिशतम् अस्ति। सेबफलोत्पादनात् वार्षिकं प्रायः ४५०० कोटिरूप्यकाणाम् आयः भवति। सः प्रदेशस्य बागवानां हितरक्षणाय केन्द्रीयसर्वकारात् हस्तक्षेपं प्रार्थितवान्। मुख्यमन्त्री उक्तवान् यत् गतसप्ताहे प्रदेशस्य बागवानाः स्वसमस्याः तस्य समक्षं प्रस्तूतवन्तः, ताः सः केन्द्रीयसर्वकारस्य समक्षं उद्गृहीतवान्। मुख्यमन्त्री अवदत् यत् सः एतद्विषयं केन्द्रीयवित्तमन्त्रिणा निर्मला- सीतारमणवर्यया सह अपि चर्चितवान्, बागवानां हिताय शीघ्रं समुचितकार्यवाहीं कर्तुम् आग्रहं कृतवान्। सः केन्द्रीयमन्त्रिणं सेबफले आयातशुल्कस्य न्यूनीकरणेन बागवानां प्रति जायमानायाः हान्याः विषये अपि अवगतं कृतवान्। सः अवदत् यत् गतदशवर्षेषु सेबफलस्य आयाते प्रायः अर्धतृतीयगुणः वृद्धि अभवत्, तथा मुक्त-व्यापार- संधि तत्र अधिका वृद्धि भवितुं शक्नोति। सः अवदत् यत् न्यूज़ीलैण्डदेशात् सेबफलस्य आयातः अधिकतमम् अप्रैलतः अगस्तपर्यन्तं भवति, अस्मिन् काले आयात-शुल्कं २५ प्रतिशतं निश्चितम् अस्ति, यदा अन्येषु मासेषु पूर्ववत् ५० प्रतिशतं शुल्कं प्रवर्तते। मुख्यमन्त्री उक्तवान् यत् विभिन्नैः मुक्तव्यापारसंधि न केवलं सेबकाले बागवानाः प्रभाविताः भविष्यन्ति, अपि तु राज्ये कोल्ड-स्टोरेजेषु संगृहीतानां सेबफलानां मूल्येषु ऑफ-सीजन-व्यापारे अपि प्रतिकूलः प्रभावः पतिष्यति। अत्र मुख्यमन्त्रिणः प्रधान-सलाहकारः रामसुभागसिंहः, मुख्यमन्त्रिणः सचिवः राकेश कंवरः अपि उपस्थितौ आस्ताम्।

# हिमाचले ऋतुपरिवर्तनम्; उच्चक्षेत्रेषु हिमपातस्य क्रमः आरब्धः




हिमसंस्कृतवार्ताः- शिमला।राज्ये अधुना ऋतुः परिवर्तितः, उच्चक्षेत्रेषु च नूतनः हिमपातः जातः। शुक्रवासरे रात्रौ आरभ्य लाहौल- स्पीति, किन्नौर, कुल्लू इत्येतेषां जनपदानाम उच्चक्षेत्रेषु हिमपातस्य क्रमः प्रचलति। रोहताङ्ग- शिंकुला- बारालाचा इत्यादिषु पर्वतमार्गेषु (Passes) निरन्तरं हिमः पतति। लाहौल-स्पीति जनपदस्य 'हंसा' क्षेत्रे प्रायः ३ सैंटीमीटर परिमितः नूतनः हिमपातः अङ्कितः, केलांग-कुकुमसेरी- गोंदला क्षेत्रेषु अपि लघु-हिमपातः जातः। अपरपक्षे ऋतुविज्ञानकेन्द्रं शिमला (Weather Department) इत्यस्य अनुमानम् अस्ति यत् २३ जनवरी पर्यन्तं प्रदेशस्य अनेकेषु भागेषु वर्षा, उच्चक्षेत्रेषु च हिमपातः भविष्यति। विगतमासत्रयात् राज्ये पर्याप्ता वर्षा हिमपातः च न जातः, येन शुष्कतापीडा (Dry Spell) उत्पन्ना आसीत्। अस्य साक्षात् प्रभावः 'रबी' ऋतुकालस्य सस्येषु, विशेषतः गोधूमस्य कृषिकार्ये दृश्यते। अपि च सेब-उत्पादकक्षेत्रेषु अपि चिन्ता वर्धिता आसीत्। एवं सति, अयं नूतनः हिमपातः वर्षा च कृषकाणां, उद्यानपालकानां, विद्युत्क्षेत्रेण सम्बद्धानां च जनानां कृते उपकारिका सिध्यति इति आशा वर्तते। तापमानस्य स्थितिः मेघाच्छादित- आकाशस्य कारणात् राज्यस्य औसतन्यूनतमतापमाने वृद्धिः अभवत्। एतत् सामान्यतापमानात् प्रायः २.४ डिग्री सैल्सियस अधिकम् अस्ति। शनिवासरे न्यूनतमतापमानस्य विवरणी अधोदत्ता अस्तिः

| नगरम् | न्यूनतमतापमानम् (Celsius) |
|---|---|
| शिमला | ८.४° |
| मनाली | ७.१° |
| सुन्दरनगरम् | ७.२° |
| धर्मशाला | २.८° |
| ऊना | ५.३° |
| सोलनम् | ५.०° |
| मण्डी | ६.३° |

जनजातीय-क्षेत्रेषु यथा कुकुमसेरी तथा ताबो इत्यत्र न्यूनतमतापमानं शून्यतः न्यूनम् (क्रमशः -१.६° तथा -२.६°)

# हिमाचलस्य ऊनाजनपदे शोककुलं वातावरणम्; कक्षायाम् अध्यापनकाले हृदयघातेन शिक्षकस्य निधनम्




**हिमसंस्कृतवार्ताः- ऊना।** हिमाचलप्रदेशस्य ऊनाजनपदे एकः दुःखदः वृत्तान्तः सम्मुखम् आगतः। अन्दौरा-स्थितस्य 'राजकीय वरिष्ठ माध्यमिक पाठशालायाः' एकस्य शिक्षकस्य शनिवासरे प्रातःकाले छात्रान् पाठयन् हृदयघातेन (Heart Attack) मृत्युः अभवत्। ५५ वर्षीयः धर्मेंद्रकुमारमहोदयः अठवां-मार्गस्य (अम्ब) निवासी आसीत्। अस्याः घटनायाः अनन्तरं विद्यालयेन सह सम्पूर्णक्षेत्रे शोकस्य वातावरणं व्याप्तम् अस्ति। शनिवासरे प्रातः प्रायः दशवादने एषा घटना घटिता। आङ्ग्लविषयस्य शिक्षकः धर्मेंद्रः यदा द्वादश्यां कक्षायां पाठयितुं गतः, तदैव तस्य हृदयघातः अभवत्। सहसा सः भ्रमणेन (चक्कर) मूर्च्छितः भूत्वा भूमौ अपतत्। कथ्यते यत् कक्षायां प्रवेशानन्तरं सः स्वस्य नियमित-स्वभावानुसारं छात्राणां मध्ये भ्रमणं (Round) करोति स्म, तदैव तस्य स्वास्थ्यं विघटितं जातम्। अकस्मात् सः प्रज्ञाहीनः भूत्वा अवनतौ पतितः।

## छात्राणाम् आर्तनादं श्रुत्वा धाविताः कर्मचारीवृन्दः

अकस्मात् घटितया अनया घटनया कक्षायां चीत्कारः अभवत्। छात्राणां कोलाहलं श्रुत्वा समीपस्थेषु प्रकोष्ठेषु पाठयन्तः अन्ये शिक्षकाः कर्मचारिणः च त्वरितं घटनास्थलं प्राप्तवन्तः। शीघ्रमेव शिक्षकं निजीवाहनेन 'सिविल अस्पताल अम्ब' इत्यत्र नीतवन्तः।

## चिकित्सकानां मतम्-

चिकित्सालये आपत्कालीन-कर्तव्ये (Emergency duty) नियुक्तः चिकित्सकः परीक्षणानन्तरं तं मृतं घोषितवान्। चिकित्सकस्य अनुसारं प्राथमिकदृष्ट्या मृत्योः कारणं 'कार्डियक अरेस्ट' (Cardiac Arrest) इति मन्यते।

## प्रातः सकुशलं गतः, घण्टाद्वयानन्तरं शवः प्रत्यागतः

चिकित्सालयात् यदैव तस्य पार्थिवशरीरं गृहं प्राप्तं, तदा परिवारजनानां करुणक्रन्दनेन वातावरणं शोकाकुलं जातम्। धर्मेंद्रस्य आकस्मिकनिधनस्य वार्तां श्रुत्वा शिक्षाविभागे क्षेत्रे च शोकः प्रसृतः। सः प्रातः गृहत् कर्तव्यपालनार्थं सकुशलं निर्गतः आसीत्, परन्तु कतिपयघण्टानां अनन्तरं तस्य मृतदेहः एव प्रत्यागतः।

## सहकर्मिभिः प्रकटितः शोकः

विद्यालयस्य प्रधानाचार्यः अन्ये सहकर्मिणः च अवदन् यत् धर्मेंद्रः एकः कर्मठः व्यवहारिकः च शिक्षकः आसीत्। ते उक्तवन्तः यत् शिक्षाविभागेन एकः उत्तमः मार्गदर्शकः लुप्तः। शनिवासरे सायं तस्य अन्तिमयात्रायां शताधिकाः जनाः सम्मिलिताः भूत्वा अश्रुपूर्णनेत्राभ्यां तस्मै अन्तिमां विदां दत्तवन्तः।

# तुष्टीकरणस्य राजनीतिद्वारा पश्चिमबङ्ग-राज्यं पृथक् क्रियते- सञ्जयशर्मा



**हिमसंस्कृतवार्ताः- धर्मशाला।** हिमाचलप्रदेशस्य भारतीयजनतापक्षस्य प्रवक्ता सञ्जयशर्मा महोदयः शनिवासरे धर्मशालायां आयोजित- पत्रकारगोष्ठ्यां पश्चिमवङ्गराज्यस्य मुख्यमन्त्री ममताबनर्जी महोदयायाः उपरि गम्भीराः आरोपाः कृतवान्। सः अवदत् यत् अध्यात्म- तपस्या- बलिदानानां भूमिः वङ्गप्रदेशः अद्य तादृशशासनात् गच्छति, यत् तं 'बङ्ग-भङ्ग' अर्थात् बङ्गराज्यस्य विभाजनदिशि नयति। सः प्रश्नं कृतवान् यत् "किं बङ्गप्रदेशः भारतस्य भागः अस्ति वा न?" अयं प्रश्नः अद्य प्रत्येकस्य देशवासिनः मनसि उत्पद्यते। सञ्जय शर्मा महोदयः उक्तवान् यत् देशस्य अनेकेषु राज्येषु SIR (Special Intensive Revision) प्रक्रिया सुव्यवस्थितरूपेण प्रचलति। एषा प्रक्रिया पूर्वमपि २००३ तमे वर्षे अभवत् संसदि च अस्याः चर्चा जाता। परन्तु पश्चिमबङ्गे एतां सांविधानिकप्रक्रियां रोद्धु न केवलम् असांविधानिकमार्गाः अप्नायन्ते, अपि तु हिंसायाः अपि आश्रयः गृह्यते। सः आरोपं कृतवान् यत् निर्वाचनसम्बद्धाः अधिकारिणः अपि तत्र सुरक्षिताः न सन्ति। तेषां उपरि एतावान् प्रभावः अस्ति यत् ते आत्महत्यासदृशं पदं ग्रहीतुं विवशाः भवन्ति। सः अवदत् यत् तुष्टीकरणस्य राजनीतिद्वारा पश्चिमवङ्गराज्यं शेषभारतात् पृथक् क्रियते। SIR प्रक्रियाकाले हिंसा, अधिकारिणां पीडनं, एकस्य BLO (बूथ स्तरीय अधिकारी) महोदयस्य आत्महत्यां च लक्ष्यीकृत्य सः तीक्ष्णं प्रहारं कृतवान्। भाजपा प्रवक्ता जादवपुर-विधानसभाक्षेत्रस्य 'बूथ' सङ्ख्या ११० इत्यस्य बीएलओ अशोकदास महोदयस्य विषयं उत्थापितवान्। सः अवदत् यत् अशोकदासः एकः सत्यनिष्ठः अधिकारी आसीत्, यः संविधाननुसारं कार्यं करोति स्म। एतस्मात् कारणात् तस्मै टीएमसी (TMC) कार्यकर्तृभ्यः भीतयः प्राप्ताः। आरोपः अस्ति यत् तस्मै उक्तं यत् यदि कस्यापि घुसपैठिनः (अवैधप्रवेशकारिणः) नाम सूच्याः निष्कासितं चेत्, तस्य परिवारस्य च हानिः भविष्यति। निरन्तरभयेन त्रस्तः अशोकदासः आत्महत्यां कृतवान्। तस्य पत्नी अस्मिन् प्रकरणे टीएमसी विरुद्धं FIR पञ्जीकृतवती अस्ति। शर्मा महोदयः बीडीओ (BDO) कार्यालयस्य उपरि जातस्य आक्रमणस्य उल्लेखं कुर्वन् अवदत् यत् एतत् आक्रमणं टीएमसी विधायकस्य मनीरुल इस्लामस्य उपस्थितौ अभवत्। सः उक्तवान् यत् "एषा राम- रहीमयोः कथा नास्ति, अपि तु रोहिंग्या-बाङ्गलादेशी- घुसपैठिनां कथा अस्ति।" सः आरोपं कृतवान् यत् ममता बनर्जी सर्वकारः अवैधप्रवेशकारिणः रक्षितुम् इच्छति, अतः SIR सदृशप्रक्रियाणां विरोधः क्रियते। सः अन्ते अवदत् यत् बङ्गप्रदेशे रक्तं वहति, लोकतन्त्रं च दलयते, एतत् सर्वं सत्तायाः संरक्षणे भवति। अस्मिन् अवसरे काङ्गडा-जनपदस्य भाजपा अध्यक्षः सचिन शर्मा अपि उपस्थितः आसीत्।

# सुक्खुशासने विधिव्यवस्था ध्वस्ता, माफियाराजः च प्रभावी- जयरामठाकुरः





**हिमसंस्कृतवार्ताः- मनाली।** सत्तायाः मदः काङ्ग्रेसनेतृणां शिरसि आरुह्य वदति, प्रदेशे च विधिव्यवस्था पूर्णतया विनष्टा अस्ति। सः 'कानूनगो', 'पटवारी' इत्यनयोः उपरि जातस्य आक्रमणस्य तीव्रभर्त्सनं कुर्वन् सचेतनां दत्तवान् यत् यदि सर्वकारः दोषिणः रक्षिष्यति, तर्हि अस्य परिणामाः अतीव गम्भीराः भविष्यन्ति। मन्त्रिणः अधिकारिणः च स्वकीये आनन्दे मग्नाः सन्ति, यदा तु सामान्याः जनाः सर्वकारीय-कर्मचारिणः च असुरक्षिताः अनुभवन्ति। पूर्वमुख्यमन्त्री विपक्षस्य नेता च जयरामठाकुरः शनिवासरे मनाली- लाहौल-विधानसभा- संयुक्तमोर्चा- कार्यकर्ता- सम्मेलने एतां वाचम् उक्तवान्। जयराममहोदयः अवदत् यत् सर्वकारस्य कार्यं जनहितार्थं निर्णयस्वीकरणं भवति, परन्तु हिमाचले स्थितिः हास्यास्पदा चिन्ताजनका च वर्तते। अत्र सर्वकारः एतस्याः निरीक्षणे (investigation) व्यस्तः भवति यत् "मुख्यमन्त्रिणः समोसा केन भक्षितम्" अथवा "वन्यकुक्कुटस्य (जंगली मुर्गा) भोजनस्य वार्ता केन प्रसारिता", यदा तु प्रदेशे भवन्तः भीषण-बसदुर्घटनाः, शिमला-नालागढक्षेत्रयोः जाताः विस्फोटाः, सर्वकारीय-कर्मचारिणाम् उपरि माफियाजनानाम् आक्रमणानि च दृष्ट्वा सर्वकारः मौनं धृत्वा उपविष्टः अस्ति। सः आरोपं कृतवान् यत् मुख्यमन्त्रिणः उपमुख्यमन्त्रिणः च ध्यानं केवलं स्वमित्रेभ्यः 'कैबिनेट- रैंक' वितरणे, परिवारजनानां कृते वृत्तिं (Job) पेन्शन-लाभं च प्रदातुं सीमितम् अस्ति। सः अवदत् यत् प्रदेश-सर्वकारस्य कार्यशैल्याः मूल्याङ्कने सः १० अङ्केभ्यः शून्यं (०) अङ्कं दास्यति। भारतीयजनतापक्षस्य विपक्षत्वेन एतत् उत्तरदायित्वं अस्ति यत् सः जनहितविरोधि- कार्याणां विरोधं कुर्यात्। प्रदेशे भाजपा-सर्वकारस्य आगमनेन सह वर्तमानसर्वकारस्य प्रत्येकस्य दोषपूर्णनिर्णयस्य सूक्ष्मतया समीक्षा भविष्यति।

# हिमाचलप्रदेशे ३१ पञ्चायतीनां सीमाः परिवर्तनीयाः भवितुं शक्नुवन्ति। मन्त्रिमण्डलस्य सभायां एतत् प्रस्तावं प्रस्तोतुं निश्चितम् अस्ति

**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशे ३१ पञ्चायतीनां सीमाः इतः तत्र परिवर्तितुं शक्यन्ते। एतासां प्रत्येकस्य पञ्चायत्याः जनसंख्या प्रायः ३००० इति अस्ति। राज्यसर्वकारेण निर्णयः कृतः यत् प्रत्येकस्य पञ्चायत्याः जनसंख्या १५०० तः २००० पर्यन्तं भवेत्। अनेन स्पष्टं भवति यत् हिमाचलप्रदेशे नवीनाः पञ्चायतयः निर्मातुं शक्यन्ते। १९ जनवरी (जनवरीमासस्य १९ दिनाङ्के) आयोज्यमानायां मन्त्रिमण्डलस्य सभायां एषः प्रस्तावः प्रस्तुतः करिष्यते। सर्वकारस्य मतम् अस्ति यत् अधिकाः पञ्चायतयः न स्पर्शनीयाः सन्ति, केवलं ३१ पञ्चायतीनां पुनर्गठनं पुनर्सीमांकनं च करणीयम् अस्ति। राज्यसर्वकारेण जनपदोपायुक्तान् शीघ्रमेव एतानि कार्याणि समाप्तुं निर्देशितम् अस्ति। सर्वकारस्य समीपे एते अपि आवेदनानि आगतानि सन्ति, येषु केचनाः पञ्चायतयः विगतैः २० वर्षैः निरन्तरं महिलानां कृते एव आरक्षिताः सन्ति। सरकारेण पञ्चायतीराज-विभागम् अपि एतासां पञ्चायतीनां वास्तविकस्थितिं ज्ञातुं निर्देशितम् अस्ति। उल्लेखनीयम् अस्ति यत् उच्चन्यायालयेन हिमाचलप्रदेश- सर्वकारं ३० अप्रैल (अप्रैलमासस्य ३० दिनाङ्कात्) पूर्वं निर्वाचनं कर्तुं निर्देशाः दत्ताः सन्ति। अधुना जनानां दृष्टिः २० जनवरी (जनवरीमासस्य २० दिनाङ्के) आयोगस्य सर्वकारस्य च मध्ये आयोज्यमानायां सभायाम् एव निबद्धा अस्ति।



असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

उपजाति-वर्ण-धर्मसम्प्रदाय-उपासनापद्धति-भाषा-संस्कृत्यादिक्षेत्रेषु अस्माकं हिन्दूनां मध्ये नैकं वैविध्यं दृश्यते चेदपि वयं सर्वे सनातनिन एव स्मो नु ? लक्ष्यमपि एकमेव, तच्च भगवत्प्राप्तिरिति । तस्मात् अस्मासु स्थितं सर्वं वैविध्यम् अन्तर्मनसा विसृज्य, सर्वे एकीभूय च आगच्छन्तु, वयं वैविध्यस्य अत्यन्तमुपरि स्थितस्य एकस्य एव धर्ममार्गस्य यात्रिणो भूत्वा ससङ्कल्पं, सप्रीति च अग्रेसराम, स्वधर्मस्य च सर्वतोभावेन संरक्षणं कुर्याम । अन्यथा कालक्रमेणो वयम् अत्यन्तं दारुणविपदि पतिष्यामः, नात्र संशयः।

# पुरातात्त्विकस्थलेषु वास्तोः दर्शनं भवति-कुलगुरुः-प्रो.शिवशङ्करमिश्रः




**हिमसंस्कृतवार्ता-डॉ.विजयकुमारः।** गतशुक्रवासरे महर्षि-पाणिनि-संस्कृत-वैदिक-विश्वविद्यालयस्य वास्तुविभागद्वारा शैक्षणिकभ्रमणस्यायोजनम् कृतम्। विश्वविद्यालयस्य माननीयानां कुलगुरुणां प्रो.शिवशङ्करमिश्रवर्याणां प्रेरणया आचार्यैः सह छात्राः महिदपुरनगरे शैक्षणिकभ्रमणं अकुर्वन्। आचार्येण उक्तं यत् एतादृशानां भ्रमणानामोद्देश्यं छात्रेषु शोधप्रवृत्तेः वर्धनं करोति। पुरातात्त्विकस्थलेषु वास्तोः दर्शनं भवति यतोहि भारतभूमौ यत्किमप्यस्ति तद्वास्तु।

अस्मिन् दले विभागाध्यक्षः डॉ. शुभम् शर्मा, विभागीयाचार्यः डॉ. विजय कुमारः तथा च ज्योतिष-विभागीयाचार्यः डॉ. रूपेश मिश्रः मार्गदर्शनं अकुर्वन्। भ्रमणदलद्वारा अश्विनी-शोध-संस्थानस्य निदेशकः डॉ.आर.सी.ठाकुरः इत्यस्य मार्गदर्शनेन ठाकुरपर्वतसिंह-संग्रहालयस्य, महिदपुरस्य दुर्गस्य, वीराङ्गना-तुलसाबाई-होल्करस्य समाधिस्थलम् इत्यादीनां स्थलानां अवलोकनं कृतम्। डॉ.ठाकुरः महिदपुरस्य इतिहासं तथा पुरातात्त्विकं महत्त्वं सरलरूपेण अवदत् तत् वास्तुछात्राणां कृते उपयोगी आसीत्। महोदयेनोक्तं यत् उज्जयिनीस्थ दन्दवाडा इत्यस्मिन् स्थाने पुरातात्त्विकं खननं भवितुं शक्यते तदर्थं वास्तुविभागीयाचार्याणां छात्राणां च सहयोगेन कार्यं कर्तुं शक्नुमः।वीराङ्गना-तुलसाबाई-होल्करस्य समाधौ सर्वैः श्रद्धापुष्पाणि अर्पितानि। 150-वर्षपूर्तेः उपलक्ष्ये सर्वैः मिलित्वा वन्दे मातरम् इत्यस्य गानं कृतम्। अवसरेऽस्मिन् डॉ.आर.सी.ठाकुरः वीराङ्गनायाः जीवनं, सङ्घर्षं तथा आङ्ग्ल-सैन्येन सह युद्धस्य वृत्तान्तं सरलया भाषया अवदत्।ठाकुर-पर्वतसिंह-संग्रहालये तथा अश्विनी-शोध-संस्थाने भ्रमणकाले छात्रैः संग्रहालयप्रबन्धनस्य सामान्यज्ञानं अपि प्राप्तम्। ज्ञातव्यम् यत् संस्थानस्य सह विभागस्य विश्वविद्यालयस्य च पूर्वतः एव अनुबन्धः (MOU) अस्ति। विश्वविद्यालयस्य माननीयः कुलगुरुःप्रो.शिवशंकरमिश्रवर्यस्य निर्देशानुसारेण नवीन-अनुबन्धविषये (MOU) आचार्यैः सह विमर्शः अभवत्। साम्प्रतिक अनुबन्धानुसारेण डॉ. आर.सी.ठाकुरमहोदयस्य मार्गदर्शनेन विश्वविद्यालयस्य वास्तुविभागे आचार्यविश्वकर्मा वास्तुपुरातत्त्वसंग्रहालयः स्थापितः। तस्य विकासविषयेऽपि दलः मार्गदर्शनं प्राप्तवान्। तदनन्तरं दलः भस्मा-टेकरी इति पुरातात्त्विकस्थलं गतवान्। अत्र छात्रैः प्राचीन-मृद्भाण्डानां विषये ज्ञानं प्राप्तं, केचन पुरावशेषाः अपि दृष्टाः। अनन्तरं दलेन मिहिरपुरस्थ (डोंगला) पद्मश्री-विष्णुश्रीधर-वाकणकर-वेधशालायाः अवलोकनं कृतम्। तत्र वेधशालायाः संचालकेन श्रीघनश्यामरत्नानीमहोदयेन खगोल-विज्ञानस्य तथा च ज्योतिर्विज्ञानस्य ज्ञानं सरलरूपेण प्रदत्तम् । अस्मिन् भ्रमणे वास्तुज्योतिर्विज्ञानविभागयोः तथा च अन्यविभागानां छात्रान् संगृह्य विंशतिः छात्राः उपस्थिताः आसन्। शैक्षणिकभ्रमणेन छात्राणां वास्तु-पुरातात्त्विक तथा च ज्योतिर्वैज्ञानिकज्ञानं वर्धितम्।

## कविकुलगुरु- कालिदास- संस्कृत- विश्वविद्यालये एकदिवसीया 'वाल्मीकि- रामायण- समीक्षात्मकाध्ययन- कार्यशाला' सम्पन्ना



# वाल्मीकि- रामायणे अनुसन्धानस्य व्यापकाः सम्भावनाः- प्रो. नन्दापुरी

**हिमसंस्कृतवार्ताः- डॉ. रेणुका बोकारे, नागपुरम्।** कविकुलगुरु- कालिदास- संस्कृत- विश्वविद्यालयस्य संस्कृतभाषा– साहित्यविभागेन श्रीसमर्थवाग्देवतामन्दिर– धुले संस्थया सह संयुक्ततया दिनाङ्के १७ जनवरी २०२६ तमे रामटके 'रामेण रामदासेन लिखितं वाल्मीकि–रामायणम्' इति विषयके एकदिवसीया समीक्षात्मकाध्ययन– कार्यशाला आयोजिता।कार्यशालायाः उद्घाटनसत्रे विशेषातिथिरूपेण संस्कृत– संस्कृतेतरभाषासंकायस्य पूर्वाधिष्ठाता प्रो. नन्दापुरीमहाभागा उपस्थिताभूत्। तया समर्थरामदासस्वामिनः, तेन विरचितस्य वाल्मीकि–रामायणस्य परिचयः प्रदत्तः। वाल्मीकि– रामायणस्य हस्तलिखितानां विषये प्रकाशं कुर्वन्त्या समर्थरामदासस्य लेखननियमान् हस्तलिखितानां सूक्ष्माध्ययनपद्धतिं च विशदीकृतम्। तया कथितं यत् रमणीया रामायणकथा अद्यापि अनुसन्धानदृष्ट्या अत्यन्तं महत्त्वपूर्णा अस्ति, अस्मिन् क्षेत्रे च व्यापकाः अनुसन्धानसम्भावनाः विद्यन्ते। श्रीसमर्थवाग्देवतामन्दिर–धुले संस्थायाः परिचयं कार्यशालायाः मार्गदर्शकः डॉ. प्रसाद भण्डारी महोदयः अकरोत्। तदनन्तरं संस्थायाः पूर्वाध्यक्षः समर्थभक्तः शरदकुबेरमहोदयः बीजभाषणं दत्तवान्। स्वीयवक्तव्ये तेन संस्थया प्रकाशितस्य सम्पूर्णवाल्मीकि– रामायण–हस्तलिखितस्य विषये विस्तरेण विवरणं प्रदत्तम्।

## संस्कृतविद्यार्थिभिः न्यूनतमम् एकस्य हस्तलिखितस्य अध्ययनं सम्पादनं च करणीयम्- प्रो. परागजोशी

कार्यशालायाः उद्घाटनसत्रस्य अध्यक्षतां संस्कृतभाषा–साहित्यविभागस्य विभागाध्यक्षः प्रो. परागजोशी महोदयः अकरोत्। स्वीयाध्यक्षीयसम्बोधने तेन विद्यार्थिभ्यः शोधार्थिभ्यश्च आह्वानं कृतं यत् संस्कृतविद्यार्थिभिः न्यूनतमं एकस्य हस्तलिखितस्य सम्पादनं कृत्वा तत्र निहितं ज्ञानं प्रकाशयितव्यम्, येन तत् समाजोपयोगि भवेत्।

कार्यशालायाः मार्गदर्शकरूपेण आई. आई. टी., मुम्बई संस्थायाः डॉ. निलेश जोशी महोदयः उपस्थितः आसीत्। तेन वाल्मीकि–रामायणस्य कालावधिं हस्तलिखितानां संरक्षणप्रक्रियां च विशदीकृतम्। अपि च समर्थरामदासेन विरचितस्य वाल्मीकि– रामायण–हस्तलिखितानामध्ययनविधिं, वाल्मीकि–रामायणपरम्परां, तत्र विद्यमानां दक्षिणाम्नाय–उत्तराम्नायपरम्परां च विस्तरेण प्रतिपादितम्। तेन विद्यार्थिभ्यः स्वाध्यायः प्रदत्तः, विभिन्नैः उपायैः वाल्मीकि– रामायण– हस्तलिखितानां प्रशिक्षणं च कृतम्। कार्यक्रमस्य प्रास्ताविकं संस्कृतभाषा–साहित्यविभागस्य सहयोगीप्राध्यापकः आधुनिकभाषाविभागस्य विभागाध्यक्षः डॉ. राजेन्द्रजैन महोदयः अकरोत्। सूत्रसञ्चालनं प्रा. राधा देशकर महाभागया कृतम्, आभारप्रदर्शनं च प्रा. सुवर्णा केवटे महाभागया कृतम्।

# अमरवाणीकविपरिषदा आयोजितम् एकमासात्मकं शीतकालिकं संस्कृतसम्भाषणशिविरम्







**हिमसंस्कृतवार्ताः- डॉ. अभिषेक पाण्डेयः।** संस्कृतभाषा न केवलं प्राचीनग्रन्थानां दिव्यवाणी, अपि तु आधुनिकजीवनेऽपि सर्वथा व्यवहारयोग्या, संवादसुलभा, चिन्तनसमृद्धा च अस्ति- इति तत्त्वं प्रत्यक्षतया प्रमाणीकुर्वत्या अमरवाणीकविपरिषदा दिनाङ्कात् १४ दिसम्बर २०२५तः १५ जनवरी २०२६ पर्यन्तं शीतकालिकम् एकमासात्मकम् आन्तर्जालीयं संस्कृतसम्भाषणशिविरम् अत्यन्तं सफलतया आयोजितम्। अस्य शिविरस्य मूलोद्देश्यं संस्कृतभाषायाः व्यावहारिक- उपयोगितायाः प्रकाशनं, छात्रेषु संवादक्षमतायाः विकासः, व्यक्तित्वपरिष्कारस्य संवर्धनं च आसीत्। एकमासपर्यन्तं सञ्चालितेषु प्रशिक्षणसत्रेषु संस्कृतसम्भाषणाभ्यासः, गीतगायनं, संवादप्रयोगः, अनुभवविनिमयः, दैनन्दिनजीवने संस्कृतस्य सहजप्रयोगविधयश्च नियमिततरूपेण प्रशिक्षुभिः अभ्यासीकृताः। शिविरस्य सम्पूर्तिसमारोहः १५ जनवरी २०२६ तमे दिनाङ्के भव्यतया सम्पन्नः। अतिथीनां वाचिकस्वागतक्रमे शिविरसंयोजकेन प्रो. शरदिन्दुकुमारतिवारी महोदयेन प्रतिपादितं यत् संस्कृतभाषायाः वैश्विकमहत्त्वं, बौद्धिकता, तार्किकसंरचना, व्यक्तित्वविकासे अस्याः अनुपमेयम् अवदानं वर्तते। शिविरपरिकल्पकेन डॉ. अरविन्दतिवारी महोदयेन “शिविराख्या” रूपेण शिविरस्य संकल्पना, उद्देश्यम्, कार्यपद्धत यश्च सुविस्तरेण प्रकाशिताः।

विशिष्टातिथिः उत्तराखण्डसंस्कृत विश्वविद्यालयस्य नूतनः कुलपतिः प्रो. रमाकान्तपाण्डेयः स्वीयोद्बोधने अवदत् यत् संस्कृतभाषा न केवलं प्राचीनग्रन्थानां भाषा, अपि तु आधुनिकजीवनस्य समर्था जीवनभाषा अपि अस्ति। यदा संस्कृतं सम्भाषणरूपेण व्यवह्रियते,तदा सा जनमानसे स्वयमेव स्थानं प्राप्नोति। अस्य शीतकालीन- एकमासात्मक- संस्कृतसम्भाषण- शिविरस्य माध्यमेन प्रशिक्षवः न केवलं शब्दज्ञानं , अपि तु आत्मविश्वासं, भाषासंवेदनां च अर्जितवन्तः। एतादृशी शिविरपरम्परा संस्कृतपुनर्जागरणस्य सशक्तं साधनम् इति तेन प्रतिपादितम्। सारस्वतातिथिः प्रो. सन्तोषकुमारशुक्लः अवदत् यत्- संस्कृतं भावनानां, संस्कृतेः, जीवनमूल्यानां च संवाहिका भाषा अस्ति। सम्भाषणशिविरेण एषा भाषा शास्त्रसीमां त्यक्त्वा लोकजीवने प्रविशति। बालकात् आरभ्य प्रौढपर्यन्तं सर्वेषां कृते संस्कृतसम्भाषणं सहजं कर्तुं शक्यते- इत्येतत् शिविरं साक्षात् प्रमाणम्। अमरवाणीकविपरिषदा अस्मिन् क्षेत्रे यदवदानं कृतम्, तत् नितरां प्रशंसनीयम्। विशिष्टातिथिः प्रो. धर्मदत्तचतुर्वेदी महोदयः अवदत्- संस्कृतसम्भाषणस्य अभ्यासः केवलं भाषाभ्यासः न, अपि तु चिन्तनशुद्धतायाः, उच्चारणशुद्धतायाः, सुसंस्कारस्य च प्रभावशाली साधनम्। एकमासात्मकेन एतेन शिविरेण शिविरप्रशिक्षूणां वाग्बलवर्धनं कृत्वा तेषां व्यक्तित्वे नूतनं तेजः सम्प्रेषितम्। यदि एतादृशानि शिविराणि सर्वत्र आयोज्येरन्, तर्हि संस्कृतं पुनः लोकभाषारूपेण प्रतिष्ठां प्राप्स्यति। डॉ. जगदानन्दझा महोदयेन उक्तं यत् संस्कृतभाषा भारतीयज्ञानपरम्परायाः मेरुदण्डः अस्ति। योगः, आयुर्वेदः, दर्शनं, काव्यं, नीतिशास्त्र सर्वेषां मूलं संस्कृते एव निहितम्। अतः संस्कृतस्य उपयोगिता केवलं अतीते न, अपि तु वर्तमानभविष्ययोः अपि व्यापिकास्ति। एतत् मासिकं सम्भाषणशिविरं संस्कृतभाषायाः जीवितप्रयोगं सुस्पष्टं दर्शयति। प्रशिक्षकाणां, सहयोगिनां, आयोजकानां च समन्वयेन एषः कार्यक्रमः आदर्शरूपेण सम्पन्नः। कार्यक्रमाध्यक्षः आचार्यहरिदत्तशर्मा अध्यक्षीयभाषणे अवदत् यत् संस्कृतं जनानां सहजसंवादभाषा भवितुम् अर्हति। अमरवाणी- कविपरिषदा आयोजितं एतत् शीतकालीनं संस्कृतसम्भाषणशिविरं भाषासाधनायाः कृते संस्कृतेन सम्भाषणार्थं च उत्तमं उदाहरणं वर्तते। प्रशिक्षकाः, कक्षासमीक्षकाः, सहयोगिनश्च निरन्तरपरिश्रमेण साधकान् मार्गदर्शितवन्तः। एषा परम्परा चिरं प्रवर्धताम् इति तेन शुभाशंसनमपि प्रदत्तम्। धन्यवादप्रकाशनक्रमे डॉ. अरविन्दतिवारी महोदयः अवोचत् यत् अस्य शीतकालीन- संस्कृत- संभाषणशिविरस्य सफलतायै साधकानां आत्मीयः उत्साहः, प्रशिक्षकानाम् अविचलिता निष्ठा, अतिथीनां स्नेहपूर्णं मार्गदर्शनं च समानरूपेण कारणभूतम्। संस्कृतसम्भाषणप्रसाराय अमरवाणी- कविपरिषदा यः दृढनिश्चयः कृतः, स एतेन एकमासात्मकशिविरेण यथार्थरूपेण सिध्दिम् अगमत्। शिविरस्य शैक्षणिकसौष्ठवं विशेषतया प्रशिक्षकवर्गस्य अथकपरिश्रमस्य फलमासीत्। आचार्या कमला पाण्डेया, सन्तोषचतुर्वेदी, डॉ. चन्द्रकान्तदत्तशुक्लः, डॉ. सचिनत्रिपाठी, शशिकान्तत्रिपाठी, डॉ. अवधेशमिश्रः, पंकजझाः, डॉ. धर्मेन्द्रतिवारी, डॉ. सरोजपाण्डेयः एतेषां मार्गदर्शनात् साधकानां संभाषणकौशलं आत्मविश्वासं च उल्लेखनीयरूपेण वर्धितम्। तथैव कक्षासमीक्षकैः सहयोगिभिश्च डॉ. सिंहासनपाण्डेयः, माधवीमधुकरझाः, डॉ. आशुतोषदुबे, जगदानन्दझाः, डॉ. शम्भुत्रिपाठी,डॉ. विपुलशुक्लः, डॉ. अनन्तमणित्रिवेदी, डॉ. अभिषेकपाण्डेयः, डॉ. लवशुक्लः, डॉ. अनुराधादुबे इत्यादिभिः महोदयैः निरन्तरं प्रदत्तः सहयोगः शिविरस्य अनुशासने महत्त्वपूर्णः आसीत्। एवं तेन सर्वेषां अतिथीनां, वक्तॄः, प्रशिक्षकान्, समीक्षका न्, सहयोगिनः च प्रति अमरवाणीकविपरिषत्परक्षतः तेन हृदयस्पर्शी कृतज्ञताभावः समर्पितः। समग्रस्य कार्यक्रमस्य सञ्चालनं डॉ. चन्द्रकान्तदत्तशुक्लेन अत्यन्तं सौष्ठवेन, संस्कृतसंवादमयशैल्या च कृतम्, येन सम्पूर्णः समारोहः सरसः, अनुशासितः, स्मरणीयश्च जातः।




# "विनोदकणिका"

भवनस्य अधः एका बालिका अतीव द्रुतं धावति स्म। तस्याः मणिबन्धे "रिस्टबैंड स्टेप काऊंटर" (धावनमापिका पट्टिका) आसीत्। एकः पितृव्यः तत् पट्टिकां दृष्टवान्। सः पृष्टवान् यत् त्वं किमर्थम् एतत् धृतवती? एकहोरायाम् दशसहस्र {१००००} पदचिह्नानि {स्टेप्स} तत्र गणना भविष्यति।

बालिका अवदत्- एषा धावनमापिका पट्टिका मम मातुः अस्ति परन्तु यदा अहं सायंकाले खेलनार्थम् आगमिष्यामि तदा एषा पट्टिका अहं धरामि। यदा सायंकाले मम पिता गृहम् आगच्छति तदा मम माता तस्मै एतत् दर्शयति। प्रतिदिनस्य नियम अस्ति वा? बालिका- आम्। इदानीम तव माता कुत्र अस्ति?

बालिका- सा तस्या Activa यानेन **जलपुरिका** खादितुं गतवती।

पितृव्यः-- 🤦 😓 😩 🙄

**डा. वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्**




# वार्ता-संवादः

नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

काव्या- नमस्ते नन्दिनि। अद्य ओस्ट्रेलिया-देशे एका अतीव आश्चर्यकरी घटना घटिता। तत्र एकया महिलया निद्रायाः अनन्तरं स्वस्य वक्षसि विशालः अजगरः दृष्टः।

नन्दिनी- अहो! तत् तु अतीव भयानकम्! दैवेन सा सुरक्षिता। किन्तु, अस्माकं भाग्यनगरे (Hyderabad) तु आकाशे आनन्दः प्रवृत्तः। तत्र 'उष्ण-वायु-गोलकानाम्' उत्सवः आरब्धः अस्ति।

काव्या- तत् दृश्यं तु नयन-मनोहरं भवेत्। आकाशस्य वार्ता श्रुता, अधुना रेल-यानस्य वार्ता श्रूयताम्। एकया विदेशीय-महिलया भारतीय-रेल-याने रात्रौ सुखदं प्रयाणं कृतम्। तया उक्तं यत् एषः अनुभवः कल्पनातः अपि उत्तमः जातः।

नन्दिनी- भारतस्य रेल-व्यवस्थायाः प्रशंसां श्रुत्वा चित्तं प्रसीदति। परन्तु अपरत्र, जर्मनी-देशे एकेन छात्रेण तत्रत्य-जीवन-व्ययस्य विवरणं दत्तम्। तेन सूचितं यत् तत्र वसति-व्ययः बहु अधिकः भवति, अतः धन-योजना पुनरपि विचारणीया।